श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे

# ॥ चतुःषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुःषष्टितमः सर्गः ॥

**राज्ञा स्वकृतेन मुनिकुमारवधेन तदीयपित्रोर्विलापस्य तत्प्रदत्तशापस्य च प्रसङ्गं श्रावयित्वा कौसल्यायाः पार्श्वे रोदं रोदं निशीथे स्वप्राणानां परित्यागः**

वधमप्रतिरूपं तु महर्षेस्तस्य राघवः।
विलपन्नेव धर्मात्मा कौसल्यामिदमब्रवीत्॥ **2.64.1** ॥

तदज्ञानान्महत्पापं कृत्वा सङ्कुलितेन्द्रियः।
एकस्त्वचिन्तयं बुद्ध्या कथं नु सुकृतं भवेत्॥ **2.64.2** ॥

ततस्तं घटमादाय पूर्णं परमवारिणा।
आश्रमं तमहं प्राप्य यथाख्यातपथं गतः॥ **2.64.3** ॥

तत्राहं दुर्बलावन्धौ वृद्धावपरिणायकौ।
अपश्यं तस्य पितरौ लूनपक्षाविव द्विजौ॥ **2.64.4** ॥

तन्निमित्ताभिरासीनौ कथाभिरपरिश्रमौ।
तामाशां मत्कृते हीनावुपासीनावनाथवत्॥ **2.64.5** ॥

शोकोपहतचित्तश्च भयसन्त्रस्तचेतनः।
तच्चाश्रमपदं गत्वा भूयः शोकमहं गतः॥ **2.64.6** ॥

पदशब्दं तु मे श्रुत्वा मुनिर्वाक्यमभाषत।
किं चिरायसि मे पुत्र पानीयं क्षिप्रमानय॥ **2.64.7** ॥

यन्निमित्तमिदं तात सलिले क्रीडितं त्वया।
उत्कण्ठिता ते मातेयं प्रविश क्षिप्रमाश्रमम्॥ **2.64.8** ॥

यद् व्यलीकं कृतं पुत्र मात्रा ते यदि वा मया।
न तन्मनसि कर्तव्यं त्वया तात तपस्विना॥ **2.64.9** ॥

त्वं गतिस्त्वगतीनां च चक्षुस्त्वं हीनचक्षुषाम्।
समासक्तास्त्वयि प्राणाः कथं त्वं नाभिभाषसे॥ **2.64.10** ॥

मुनिमव्यक्तया वाचा तमहं सज्जमानया।
हीनव्यञ्जनया प्रेक्ष्य भीतचित्त इवाब्रुवम्॥ **2.64.11** ॥

मनसः कर्म चेष्टाभिरभिसंस्तभ्य वाग्बलम्।
आचचक्षे त्वहं तस्मै पुत्रव्यसनजं भयम्॥ **2.64.12** ॥

क्षत्रियोऽहं दशरथो नाहं पुत्रो महात्मनः।
सज्जनावमतं दुःखमिदं प्राप्तं स्वकर्मजम्॥ **2.64.13** ॥

भगवंश्चापहस्तोऽहं सरयूतीरमागतः।
जिघांसुः श्वापदं किञ्चिन्निपाने वागतं गजम्॥ **2.64.14** ॥

ततः श्रुतो मया शब्दो जले कुम्भस्य पूर्यतः।
द्विपोऽयमिति मत्वाहं बाणेनाभिहतो मया॥ **2.64.15** ॥

गत्वा तस्यास्ततस्तीरमपश्यमिषुणा हृदि।
विनिर्भिन्नं गतप्राणं शयानं भुवि तापसम्॥ **2.64.16** ॥

ततस्तस्यैव वचनादुपेत्य परितप्यतः।
स मया सहसा बाण उद्धृतो मर्मतस्तदा॥ **2.64.17** ॥

स चोद्धृतेन बाणेन सहसा स्वर्गमास्थितः।
भगवन्तावुभौ शोचन्नन्धाविति विलप्य च॥ **2.64.18** ॥

अज्ञानाद् भवतः पुत्रः सहसाभिहतो मया।
शेषमेवं गते यत् स्यात् तत् प्रसीदतु मे मुनिः ॥ **2.64.19** ॥

स तच्छ्रुत्वा वचः क्रूरं मया तदघशंसिना।
नाशकत् तीव्रमायासं स कर्तुं भगवानृषिः ॥ **2.64.20** ॥

स बाष्पपूर्णवदनो निःश्वसन् शोकमूर्च्छितः।
मामुवाच महातेजाः कृताञ्जलिमुपस्थितम् ॥ **2.64.21** ॥

यद्येतदशुभं कर्म न स्म मे कथयेः स्वयम्।
फलेन्मूर्धा स्म ते राजन् सद्यः शतसहस्रधा ॥ **2.64.22** ॥

क्षत्रियेण वधो राजन् वानप्रस्थे विशेषतः।
ज्ञानपूर्वं कृतः स्थानाच्च्यावयेदपि वज्रिणम् ॥ **2.64.23** ॥

सप्तधा तु भवेन्मूर्धा मुनौ तपसि तिष्ठति।
ज्ञानाद् विसृजतः शस्त्रं तादृशे ब्रह्मवादिनि ॥ **2.64.24** ॥

अज्ञानाद्धि कृतं यस्मादिदं ते तेन जीवसे।
अपि ह्यकुशलं न स्याद् राघवाणां कुतो भवान् ॥ **2.64.25** ॥

नय नौ नृप तं देशमिति मां चाभ्यभाषत।
अद्य तं द्रष्टुमिच्छावः पुत्रं पश्चिमदर्शनम् ॥ **2.64.26** ॥

रुधिरेणावसिक्ताङ्गं प्रकीर्णाजिनवाससम्।
शयानं भुवि निःसंज्ञं धर्मराजवशं गतम् ॥ **2.64.27** ॥

अथाहमेकस्तं देशं नीत्वा तौ भृशदुःखितौ।
अस्पर्शयमहं पुत्रं तं मुनिं सह भार्यया ॥ **2.64.28** ॥

तौ पुत्रमात्मनः स्पृष्ट्वा तमासाद्य तपस्विनौ।
निपेततुः शरीरेऽस्य पिता चैनमुवाच ह ॥ **2.64.29** ॥

नाभिवादयसे माद्य न च मामभिभाषसे।
किं च शेषे तु भूमौ त्वं वत्स किं कुपितो ह्यसि ॥ **2.64.30** ॥

नन्वहं तेऽप्रियः पुत्र मातरं पश्य धार्मिकीम्।
किं च नालिङ्गसे पुत्र सुकुमार वचो वद ॥ **2.64.31** ॥

कस्य वा पररात्रेऽहं श्रोष्यामि हृदयङ्गमम्।
अधीयानस्य मधुरं शास्त्रं वान्यद् विशेषतः ॥ **2.64.32** ॥

को मां सन्ध्यामुपास्यैव स्नात्वा हुतहुताशनः।
श्लाघयिष्यत्युपासीनः पुत्रशोकभयार्दितम् ॥ **2.64.33** ॥

कन्दमूलफलं हृत्वा यो मां प्रियमिवातिथिम्।
भोजयिष्यत्यकर्मण्यमप्रग्रहमनायकम् ॥ **2.64.34** ॥

इमामन्धां च वृद्धां च मातरं ते तपस्विनीम्।
कथं पुत्र भरिष्यामि कृपणां पुत्रगर्धिनीम् ॥ **2.64.35** ॥

तिष्ठ मा मा गमः पुत्र यमस्य सदनं प्रति।
श्वो मया सह गन्तासि जनन्या च समेधितः ॥ **2.64.36** ॥

उभावपि च शोकार्तावनाथौ कृपणौ वने।
क्षिप्रमेव गमिष्यावस्त्वया हीनौ यमक्षयम् ॥ **2.64.37** ॥

ततो वैवस्वतं दृष्ट्वा तं प्रवक्ष्यामि भारतीम्।
क्षमतां धर्मराजो मे बिभृयात् पितरावयम् ॥ **2.64.38** ॥

दातुमर्हति धर्मात्मा लोकपालो महायशाः।
ईदृशस्य ममाक्षय्यामेकामभयदक्षिणाम् ॥ **2.64.39** ॥

अपापोऽसि यथा पुत्र निहतः पापकर्मणा।
तेन सत्येन गच्छाशु ये लोकास्त्वस्त्रयोधिनाम् ॥ **2.64.40** ॥

यां हि शूरा गतिं यान्ति सङ्ग्रामेष्वनिवर्तिनः।
हतास्त्वभिमुखाः पुत्र गतिं तां परमां व्रज ॥ **2.64.41** ॥

यां गतिं सगरः शैब्यो दिलीपो जनमेजयः।
नहुषो धुन्धुमारश्च प्राप्तास्तां गच्छ पुत्रक ॥ **2.64.42** ॥

या गतिः सर्वभूतानां स्वाध्यायात् तपसश्च या।
भूमिदस्याहिताग्नेश्च एकपत्नीव्रतस्य च ॥ **2.64.43** ॥

गोसहस्रप्रदातॄणां गुरुसेवाभृतामपि।
देहन्यासकृतां या च तां गतिं गच्छ पुत्रक ॥ **2.64.44** ॥

न हि त्वस्मिन् कुले जातो गच्छत्यकुशलां गतिम्।
स तु यास्यति येन त्वं निहतो मम बान्धवः ॥ **2.64.45** ॥

एवं स कृपणं तत्र पर्यदेवयतासकृत्।
ततोऽस्मै कर्तुमुदकं प्रवृत्तः सह भार्यया ॥ **2.64.46** ॥

स तु दिव्येन रूपेण मुनिपुत्रः स्वकर्मभिः।
स्वर्गमध्यारुहत् क्षिप्रं शक्रेण सह धर्मवित् ॥ **2.64.47** ॥

आबभाषे च तौ वृद्धौ शक्रेण सह तापसः।
आश्वस्य च मुहूर्तं तु पितरं वाक्यमब्रवीत् ॥ **2.64.48** ॥

स्थानमस्मि महत् प्राप्तो भवतोः परिचारणात्।
भवन्तावपि च क्षिप्रं मम मूलमुपैष्यथः ॥ **2.64.49** ॥

एवमुक्त्वा तु दिव्येन विमानेन वपुष्मता।
आरुरोह दिवं क्षिप्रं मुनिपुत्रो जितेन्द्रियः ॥ **2.64.50** ॥

स कृत्वाथोदकं तूर्णं तापसः सह भार्यया।
मामुवाच महातेजाः कृताञ्जलिमुपस्थितम् ॥ **2.64.51** ॥

अद्यैव जहि मां राजन् मरणे नास्ति मे व्यथा।
यः शरेणैकपुत्रं मां त्वमकार्षीरपुत्रकम्॥ **2.64.52** ॥

त्वयापि च यदज्ञानान्निहतो मे स बालकः।
तेन त्वामपि शप्स्येऽहं सुदुःखमतिदारुणम्॥ **2.64.53** ॥

पुत्रव्यसनजं दुःखं यदेतन्मम साम्प्रतम्।
एवं त्वं पुत्रशोकेन राजन् कालं करिष्यसि॥ **2.64.54** ॥

अज्ञानात्तु हतो यस्मात् क्षत्रियेण त्वया मुनिः।
तस्मात् त्वां नाविशत्याशु ब्रह्महत्या नराधिप॥ **2.64.55** ॥

त्वामप्येतादृशो भावः क्षिप्रमेव गमिष्यति।
जीवितान्तकरो घोरो दातारमिव दक्षिणाम्॥ **2.64.56** ॥

एवं शापं मयि न्यस्य विलप्य करुणं बहु।
चितामारोप्य देहं तन्मिथुनं स्वर्गमभ्ययात्॥ **2.64.57** ॥

तदेतच्चिन्तयानेन स्मृतं पापं मया स्वयम्।
तदा बाल्यात् कृतं देवि शब्दवेध्यनुकर्षिणा॥ **2.64.58** ॥

तस्यायं कर्मणो देवि विपाकः समुपस्थितः।
अपथ्यैः सह सम्भुक्ते व्याधिरन्नरसे यथा॥ **2.64.59** ॥

तस्मान्मामागतं भद्रे तस्योदारस्य तद् वचः।
इत्युक्त्वा स रुदंस्त्रस्तो भार्यामाह तु भूमिपः॥ **2.64.60** ॥

यदहं पुत्रशोकेन सन्त्यजिष्यामि जीवितम्।
चक्षुर्भ्यां त्वां न पश्यामि कौसल्ये त्वं हि मां स्पृश॥ **2.64.61** ॥

यमक्षयमनुप्राप्ता द्रक्ष्यन्ति नहि मानवाः।
यदि मां संस्पृशेद् रामः सकृदन्वारभेत वा॥ **2.64.62** ॥

धनं वा यौवराज्यं वा जीवेयमिति मे मतिः।
न तन्मे सदृशं देवि यन्मया राघवे कृतम्॥ **2.64.63** ॥

सदृशं तत्तु तस्यैव यदनेन कृतं मयि।
दुर्वृत्तमपि कः पुत्रं त्यजेद् भुवि विचक्षणः॥ **2.64.64** ॥

कश्च प्रव्राज्यमानो वा नासूयेत् पितरं सुतः।
चक्षुषा त्वां न पश्यामि स्मृतिर्मम विलुप्यते॥ **2.64.65** ॥

दूता वैवस्वतस्यैते कौसल्ये त्वरयन्ति माम्।
अतस्तु किं दुःखतरं यदहं जीवितक्षये॥ **2.64.66** ॥

नहि पश्यामि धर्मज्ञं रामं सत्यपराक्रमम्।
तस्यादर्शनजः शोकः सुतस्याप्रतिकर्मणः॥ **2.64.67** ॥

उच्छोषयति वै प्राणान् वारि स्तोकमिवातपः।
न ते मनुष्या देवास्ते ये चारुशुभकुण्डलम्॥ **2.64.68** ॥

मुखं द्रक्ष्यन्ति रामस्य वर्षे पञ्चदशे पुनः।
पद्मपत्रेक्षणं सुभ्रु सुदंष्ट्रं चारुनासिकम्॥ **2.64.69** ॥

धन्या द्रक्ष्यन्ति रामस्य ताराधिपसमं मुखम्।
सदृशं शारदस्येन्दोः फुल्लस्य कमलस्य च॥ **2.64.70** ॥

सुगन्धि मम रामस्य धन्या द्रक्ष्यन्ति ये मुखम्।
निवृत्तवनवासं तमयोध्यां पुनरागतम्॥ **2.64.71** ॥

द्रक्ष्यन्ति सुखिनो रामं शुक्रं मार्गगतं यथा।
कौसल्ये चित्तमोहेन हृदयं सीदतेतराम्॥ **2.64.72** ॥

वेदये न च संयुक्ताञ्शब्दस्पर्शरसानहम्।
चित्तनाशाद् विपद्यन्ते सर्वाण्येवेन्द्रियाणि हि।
क्षीणस्नेहस्य दीपस्य संरक्ता रश्मयो यथा॥ **2.64.73**॥

अयमात्मभवः शोको मामनाथमचेतनम्।
संसाधयति वेगेन यथा कूलं नदीरयः॥ **2.64.74**॥

हा राघव महाबाहो हा ममायासनाशन।
हा पितृप्रिय मे नाथ हा ममासि गतः सुत॥ **2.64.75**॥

हा कौसल्ये न पश्यामि हा सुमित्रे तपस्विनि।
हा नृशंसे ममामित्रे कैकेयि कुलपांसनि॥ **2.64.76**॥

इति मातुश्च रामस्य सुमित्रायाश्च सन्निधौ।
राजा दशरथः शोचञ्जीवितान्तमुपागमत्॥ **2.64.77**॥

तथा तु दीनः कथयन् नराधिपः
    प्रियस्य पुत्रस्य विवासनातुरः।
गतेऽर्धरात्रे भृशदुःखपीडित -
    स्तदा जहौ प्राणमुदारदर्शनः॥ **2.64.78**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अयोध्याकाण्डे चतुःषष्टितमः सर्गः॥